॥ वाल्मीकि रामायण॥

३ अरण्यकाण्ड

अध्याय ४२

तथा तु तं समादिश्य भ्रातरं रघुनन्दनः ।
बबन्धासिं महातेजा जाम्बूनदमयत्सरुम् ॥ १॥

ततस्त्रिविणतं चापमादायात्मविभूषणम् ।
आबध्य च कलापौ द्वौ जगामोदग्रविक्रमः ॥ २॥

तं वञ्चयानो राजेन्द्रमापतन्तं निरीक्ष्य वै ।
बभूवान्तर्हितस्त्रासात्पुनः सन्दर्शनेऽभवत् ॥ ३॥

बद्धासिर्धनुरादाय प्रदुद्राव यतो मृगः ।
तं स पश्यति रूपेण द्योतमानमिवाग्रतः ॥ ४॥

अवेक्ष्यावेक्ष्य धावन्तं धनुष्पाणिर्महावने ।
अतिवृत्तमिषोः पाताल्लोभयानं कदा चन ॥ ५॥

शङ्कितं तु समुद्भ्रान्तमुत्पतन्तमिवाम्बरे ।
दश्यमानमदृश्यं च नवोद्देशेषु केषु चित् ॥ ६॥

छिन्नाभ्रैरिव संवीतं शारदं चन्द्रमण्डलम् ।
मुहूर्तादेव ददृशे मुहुर्दूरात्प्रकाशते ॥ ७॥

दर्शनादर्शनेनैव सोऽपाकर्षत राघवम् ।
आसीत्क्रुद्धस्तु काकुत्स्थो विवशस्तेन मोहितः ॥ ८॥

अथावतस्थे सुश्रान्तश्छायामाश्रित्य शाद्वले ।
मृगैः परिवृतो वन्यैरदूरात्प्रत्यदृश्यत ॥ ९॥

दृष्ट्वा रामो महातेजास्तं हन्तुं कृतनिश्चयः ।
सन्धाय सुदृढे चापे विकृष्य बलवद्बली ॥ १०॥

तमेव मृगमुद्दिश्य ज्वलन्तमिव पन्नगम् ।
मुमोच ज्वलितं दीप्तमस्त्रब्रह्मविनिर्मितम् ॥ ११॥

स भृशं मृगरूपस्य विनिर्भिद्य शरोत्तमः ।
मारीचस्यैव हृदयं विभेदाशनिसंनिभः ॥ १२॥

तालमात्रमथोत्पत्य न्यपतत्स शरातुरः ।
व्यनदद्भैरवं नादं धरण्यामल्पजीवितः ।
म्रियमाणस्तु मारीचो जहौ तां कृत्रिमां तनुम् ॥ १३॥

सम्प्राप्तकालमाज्ञाय चकार च ततः स्वरम् ।
सदृशं राघवस्यैव हा सीते लक्ष्मणेति च ॥ १४॥

तेन मर्मणि निर्विद्धः शरेणानुपमेन हि ।
मृगरूपं तु तत्त्यक्त्वा राक्षसं रूपमात्मनः ।
चक्रे स सुमहाकायो मारीचो जीवितं त्यजन् ॥ १५॥

ततो विचित्रकेयूरः सर्वाभरणभूषितः ।
हेममाली महादंष्ट्रो राक्षसोऽभूच्छराहतः ॥ १६॥

तं दृष्ट्वा पतितं भूमौ राक्षसं घोरदर्शनम् ।
जगाम मनसा सीतां लक्ष्मणस्य वचः स्मरन् ॥ १७॥

हा सीते लक्ष्मणेत्येवमाक्रुश्य तु महास्वरम् ।
ममार राक्षसः सोऽयं श्रुत्वा सीता कथं भवेत् ॥ १८॥

लक्ष्मणश्च महाबाहुः कामवस्थां गमिष्यति ।
इति सञ्चिन्त्य धर्मात्मा रामो हृष्टतनूरुहः ॥ १९॥

तत्र रामं भयं तीव्रमाविवेश विषादजम् ।
राक्षसं मृगरूपं तं हत्वा श्रुत्वा च तत्स्वरम् ॥ २०॥

निहत्य पृषतं चान्यं मांसमादाय राघवः ।
त्वरमाणो जनस्थानं ससाराभिमुखस्तदा ॥ २१॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made

publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com